# वैयाकरणसिद्धान्तकौमुदी

## हल्सन्धिप्रकरणम् (५)

गीतगोविन्दसंस्कृतसङ्घः - २०१०

# १३५. समः सुटि (८.३.५)

- पदद्वयम् ।
- 'मतुवसो रु सम्बुद्धौ छन्दसि' (८.३.१) इत्यतः 'रु' इति अनुवर्तते ।
- समः – षष्ठी = सम्- इति उपसर्गस्य स्थाने
- सुटि – सप्तमी = सुटि परे
- रुः – प्रथमा = रुँ इत्यादेशः स्यात्
- समो रुः स्यात् सुटि ।
- 'अलोऽन्त्यस्य' इति अन्तादेशः ।
- रुँ – 'उपदेशोऽजनुनासिक इत्' इति उकारस्य इत्संज्ञा, तस्य लोपः ।

- सम् + कर्ता
- सम् + स् कर्ता ('सम्परिभ्यां करोतौ भूषणे' – ६.१.१३७ – इति कृञ्-धातोः सुडागमः)
- सर् + स् कर्ता ('समः सुटि' – ८.३.५ – इति रुत्वम्)

# १३६. अत्रानुनासिकः पूर्वस्य तु वा (८.३.२)

- अत्र रुप्रकरणे रोः पूर्वस्य अनुनासिको वा स्यात् ।
- सर् + स् कर्ता ('समः सुटि'  इति रुत्वम्)
- सँर् + स् कर्ता ('अत्रानुनासिकः पूर्वस्य तु वा')

# १३७. अनुनासिकात् परोऽनुस्वारः (८.३.४)

- अनुनासिकं विहाय रोः पूर्वस्मात् परः अनुस्वारागमः स्यात् ।
- सर् + स् कर्ता
- संर् + स् कर्ता

- खरवसानयोर्विसर्जनीयः (८.३.१५)
- खरि अवसाने च परे रेफस्य विसर्जनीयः स्यात् पदान्ते ।

# १३८. विसर्जनीयस्य सः (८.३.३४)

- ’खरवसानयोर्विसर्जनीयः’ इति सूत्रात् खरि इति अनुवर्तते ।
- खरि परे विसर्जनीयस्य सः स्यात् ।

- वा शरि (८.३.३६) – शरि परे विसर्जनीयस्य विसर्जनीय एव वा स्यात् ।

- एतदपवादे ’वा शरि’ इति पाक्षिके विसर्गे प्राप्ते ’संपुंकानां सो वक्तव्यः’ (वा)

| अनुनासिकपक्षे | अनुस्वारपक्षे |
| --- | --- |
| सँर् + स्कर्ता | संर् + स्कर्ता |
| सँ◌ः + स्कर्ता (खरवसानयोः विसर्जनीयः) | सं◌ः स्कर्ता (खरवसानयोः विसर्जनीयः) |
| सँस् + स्कर्ता (संपुंकानां सो वक्तव्यः) | संस् स्कर्ता (संपुंकानां सो वक्तव्यः) |
| १. सँस्स्कर्ता | २. संस्स्कर्ता |

’समो वा लोपमेके’ इति भाष्यम्

सम् + स्कर्ता
स + स्कर्ता (’समो वा लोपमेके’ इति मकारस्य लोपः)
लोपस्यापि रुप्रकरणस्थत्वात् अनुस्वारानुनासिकाभ्याम् एकसकारं रूपद्वयम् ।

३. सँस्कर्ता (अत्रानुनासिकः पूर्वस्य तु वा)
४. संस्कर्ता (अनुनासिकात् परोऽनुस्वारः)

द्विसकारं तु उक्तमेव ।

तत्र 'अनचि च' इति सकारस्य द्वित्वपक्षे त्रिसकारमपि रूपद्वयम् ।

| | | | |
|---|---|---|---|
| सँ | स् | स् | कर्ता |
| अच् | यर् | न अच् | |
| सँ | स् स् | स् | कर्ता |

५. सँस्स्स्कर्ता (अनचि च)

| | | | |
|---|---|---|---|
| सं | स् | स् | कर्ता |
| अच्? | यर् | न अच् | |

अनुस्वार-विसर्ग-जिह्वामूलीय-उपध्मानीय-यमानाम् अकारोपरि शर्षु च पाठस्य उपसंख्यातत्वेन अनुस्वारस्यापि अच्त्वात् ।

| | | | |
|---|---|---|---|
| सं | स् स् | स् | कर्ता |

६. संस्स्स्कर्ता (अनचि च)

१. सँस्कर्ता
२. सँस्स्कर्ता
३. सँस्स्स्कर्ता

१. संस्कर्ता
२. संस्स्कर्ता
३. संस्स्स्कर्ता

# शरः खयः (वा)

- शरः परस्य खयः द्वे वा स्तः ।
- सँस्कर्ता

| | | | |
|---|---|---|---|
| सँ | स् | क् | अर्ता |
| | शर् | खय् | |
| सँ | स् | क् क् | अर्ता |

४. सँस्क्कर्ता
५. सँस्स्क्कर्ता
६. सँस्स्स्क्कर्ता

अनुनासिकवतां त्रयाणां 'शरः खयः' इति कद्वित्वे षट् ।

- संस्कर्ता – संस्क्कर्ता ('शरः खयः' इति ककारस्य द्वित्वम्)
- संस्स्कर्ता – संस्स्क्कर्ता
- संस्स्स्कर्ता – संस्स्स्क्कर्ता

- एषु षड्सु रूपेषु 'अनचि च' इति अनुस्वारस्य द्वित्वे द्वादश रूपाणि ।
- अनुस्वारवताम् अनुस्वारस्यापि द्वित्वे द्वादश ।

- अनुनासिकरूपाणि (६) + अनुस्वाररूपाणि (१२)

- एषामष्टादशानां तकारस्य द्वित्वे वचनान्तरेण पुनः द्वित्वे च एकतं द्वितं त्रितम् इति चतुष्पञ्चाशत् ।
- सँस्कर्ता

| | | | | |
|---|---|---|---|---|
| सँस्क् | अ | र् | त् | आ |
| | अच् | रेफः | यर् | |
| सँस्क् | अ | र् | त् त् | आ (अचो रहाभ्यां द्वे) |
| | | यण् | मय् | |
| सँस्क् | अ | र् | त् त् त् | आ (यणो मयो द्वे वाच्ये) |

- अणोऽनुनासिकत्वे अष्टोत्तरं शतम् ।
- संस्कर्ता
- संस्कर्ताँ  ('अणोऽप्रगृह्यस्यानुनासिकः' – अप्रगृह्यस्य अणः अवसाने अनुनासिकः वा स्यात् )

- संस्कृतम् – कति रूपाणि?

# १३९. पुमः खय्यम्परे (८.३.६)

- पदत्रयम् । पुमः, खयि, अम्परे ।
- 'मतुवसो रु सम्बुद्धौ छन्दसि' इत्यतः 'रु' इति अनुवर्तते ।
- पुमः – षष्ठी = पुम्-शब्दस्य स्थाने
- अम्परे खयि – सप्तमी = अम्-परके खय्-वर्णे परे
- रुँ – प्रथमा = रुत्वं स्यात् ।
- अम्परे खयि पुम्-शब्दस्य रुः स्यात् ।

पुम् + कोकिलः

पुम्  क्  ओ  किलः

खय्  अम्

पुर्  क्  ओ  किलः

पुँर्  कोकिलः  (अत्रानुनासिकः...)  पुंर्  कोकिलः (अनुनासिकात्...)

पुँः  कोकिलः  (खरवसानयोः विसर्जनीयः)  पुंः  कोकिलः

व्युत्पत्तिपक्षे 'अप्रत्ययस्य' इति षत्वपर्युदासात् ∩क∩पयोः प्राप्तौ,
अव्युत्पत्तिपक्षे तु षत्वप्राप्तौ, 'संपुंकानाम्' इति सः ।

- 'कुप्वोः ∩क∩पौ च' – कवर्गे पवर्गे च परे विसर्जनीयस्य क्रमात् जिह्वामूलीय-उपध्मानीयौ स्तः ।

- इदुदुपधस्य चाप्रत्ययस्य – इकार-उकारोपधस्य अप्रत्ययस्य विसर्गस्य षः स्यात् कुप्वोः ।

पुंस् – उणादिप्रत्ययान्तः । उणादीनि व्युत्पन्नानि इति पक्षे,

पाति इति पुमान् ।

पा डुंसुन् ('पातेर्डुंसुँन्' इति सूत्रेण डुंसुन्-प्रत्ययः)

पा उंस् ('चुटू' इति डकारस्य, 'उपदेशोऽजनुनासिक इत्' इति सकारोत्तर-उकारस्य, 'हलन्त्यम्' इति नकारस्य च इत्संज्ञा, तस्य लोपः)

प् उंस् ('टेः' इति टिलोपः)

पुंस्

- पुमान् कोकिलः (कर्मधारयसमासः)
- पुंस्   सु        कोकिल   सु
- पुंस्   कोकिल  ('सुपो धातुप्रातिपदिकयोः' इति प्रत्ययलोपः)
- पुम्   कोकिल ('संयोगान्तस्य लोपः' इति सकारलोपः)
- पुर्   कोकिल ('पुमः खय्यम्परे' इति रुत्वम्)
- पुँर् कोकिल (अत्रानुनासिकः...)  / पुंर्  कोकिल (अनुनासिकात्...)
- पुँ◌ः कोकिल   (खरवसानयोर्विसर्जनीयः)    पुं◌ः      कोकिल
- प्रत्ययस्य मकारस्य स्थाने रुत्वम्, तस्य स्थाने विसर्गः – तस्मादयं प्रत्ययस्य विसर्गः । 'इदुदुपधस्य चाप्रत्ययस्य' इत्यनेन प्रत्ययभिन्नस्यैव विसर्गस्य षत्वविधानात् अत्र षत्वस्य प्राप्तिः नास्ति । 'कुप्वोः ᳵकᳵपौ च' इति जिह्वामूलीयः प्राप्नोति ।

- उणादीनि अव्युत्पन्नानि इत्यपरः पक्षः । तदा तु प्रकृति-प्रत्ययविवेचनं नास्ति । 'इदुदुपधस्य चाप्रत्ययस्य' इति विसर्गस्य स्थाने षत्वं प्राप्नोति ।

- एतदुभयं बाधित्वा 'संपुंकानां सो वक्तव्यः' इति वार्तिकेन सकारः ।

- पुँस्कोकिलः / पुंस्कोकिलः

- पुम् + पुत्रः = पुँस्पुत्रः / पुंस्पुत्रः

अम्परे किम्? पुंक्षीरम् ।

पुम् + क्षीरम्

| | | | |
|---|---|---|---|
| पुम् | क् | ष् | ईरम् |
| | खय् | न अम् | |

खयि किम्? पुंदासः ।

| | | | |
|---|---|---|---|
| पुम् | द् | आ | सः |
| | न खय् | अम् | |

# ’ख्याञादेशे न’ (वा)

- चक्षिङ् धातोः ’चक्षिङः ख्याञ्’ इत्यनेन ’ख्याञ्’ इति आदेशो विधीयते । ख्याञादेशे पुम्-शब्दस्य रुत्वं न भवति ।
- पुं + ख्यानम् = पुंख्यानम् ।

# १४०. नश्छव्यप्रशान् (८.३.७)

- पदत्रयम् । नः, छवि, अप्रशान् ।
- 'मतुवसो रु सम्बुद्धौ छन्दसि' इत्यतः 'रु' इति, 'पुमः खय्यम्परे' इत्यतः 'अम्परे' इति च अनुवर्तते । 'पदस्य' इति अधिक्रियते ।
- नः पदस्य – षष्ठी = नकारान्तस्य पदस्य
- अम्परे छवि – सप्तमी = अम्-परके छव्-वर्णे परे
- रुः – प्रथमा = रुत्वं स्यात्
- अप्रशान् – प्रशान् शब्दस्य न भवति
- अम्परे छवि नकारान्तस्य पदस्य रुः स्यात्, न तु प्रशान् शब्दस्य ।

शार्ङ्गिन् छिन्धि

| | | | |
|---|---|---|---|
| शार्ङ्गिन् | छ् | इ | न्धि |
| नकारान्तं पदम् | छव् | अम् | |
| शार्ङ्गिर् | छ् | इ | न्धि |

- शार्ङ्गिन्  छिन्धि
- शार्ङ्गिर्  छिन्धि ('नश्छव्यप्रशान्' – ८.३.७ – इति रुत्वम्)
- शार्ङ्गिँर्  छिन्धि ('अत्रानुनासिकः पूर्वस्य तु वा' – ८.३.२ )
- शार्ङ्गिँः  छिन्धि ('खरवसानयोः विसर्जनीयः' – ८.३.१७ – इति रेफस्य विसर्गादेशः)
- शार्ङ्गिँस्  छिन्धि ('विसर्जनीयस्य सः' – ८.३.३४ – इति सत्वम्)
- शार्ङ्गिँश्  छिन्धि ('स्तोः श्चुना श्चुः' – ८.४.४० – इति श्चुत्वम्)

१) **शार्ङ्गिँश्छिन्धि**

२) **शार्ङ्गिंश्छिन्धि** ('अनुनासिकात् परोऽनुस्वारः' – ८.३.४ – इति अनुस्वारपक्षे)

- चक्रिन् + त्रायस्व = चक्रिँस्त्रायस्व / चक्रिंस्त्रायस्व

- 'पदस्य' किम्? हन्ति ।
- हन् + त् इ
- छव् अम्

- 'अम्परे' किम्? सन्त्सरुः । त्सरुः खड्गमुष्टिः ।
- सन् त् स् अरुः
- नकारान्तं पदम् छव् न अम्

- ’अप्रशान्’ किम्? प्रशान्तनोति ।
- प्रशान् त् अ नोति
- नकारान्तं पदम् छव् अम्